# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
## सत्रान्तपरीक्षा-अक्टूबर-२०१९

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) प्रश्नपत्रम् – २ गुणा: - ७०

विषय: - स्वामिनारायणवेदान्तः (J) कोड – CC411 (NEW) समय: - ०८ त: ११

दिनाङ्क: - १०-१०-२०१९ सन्दर्भग्रन्थः – ब्रह्मसूत्रभाष्यरत्नम्-१

---

### प्रथमान्वितिः- १

प्रश्नः – १ निम्नलिखितयोरेकमेव सूत्रं भाष्यानुगुणं व्याख्यात। ०५

१. अथातो ब्रह्मजिज्ञासा।
२. आकाशस्तल्लिङ्गात्।

प्रश्नः – २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत। १०

१. धर्मात्मजमहं वन्दे मुक्तानन्दः सदा हरिम्।
दिव्यं गुणातिगाकारं सच्चिदानन्दधर्मिणम्॥ इति मङ्गलपद्यं व्याख्यात।
२. शास्त्रयोनित्वाधिकरणं भाष्यरत्नानुगुणं व्याख्यात।

### द्वितीयान्वितिः - २

प्रश्नः – ३ निम्नलिखितयोरेकमेव सूत्रं भाष्यानुगुणं व्याख्यात। ०५

१. विवक्षितगुणोपपत्तेश्च।
२. सुखविशिष्टाभिधानादेव च।

प्रश्नः – ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत। १०

१. यथाग्रन्थम् अन्तर्याम्यधिकरणं प्रतिपादयत।
२. विशेषणाच्च – इति सूत्रमाधारीकृत्य जीवनारायणयोः शरीरशरीरिभावमुपपादयत।

### तृतीयान्वितिः - ३

**प्रश्नः – ५** **निम्नलिखितयोरेकमेव सूत्रं भाष्यानुगुणं व्याख्यात।** **०५**

१. भावं तु बादरायणोऽस्ति हि।

२. मुक्तोपश्रुत्यव्यपदेशाच्च।

**प्रश्नः – ६** **कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **१०**

१. अक्षरमम्बरान्तधृतेः – इति सूत्रे अक्षरपरतया कः प्रोक्तः ? यथाभाष्यं स्पष्टयत।

२. स्त्रीणां शूद्राणाञ्च भगवदुपासनाधिकारो अस्ति न वा ? अपशूद्राधिकरणमाधारीकृत्य लिखत।

## चतुर्थान्वितिः - ४

**प्रश्नः – ७** **निम्नलिखितयोरेकमेव सूत्रं भाष्यानुगुणं व्याख्यात।** **०५**

१. आत्मकृतेः।

२. कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः।

**प्रश्न-:- ८** **कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **१०**

१. यथाभाष्यं सर्वव्याख्यानाधिकरणमुपपादयत।

२. ब्रह्म जगतः निमित्तकारणम् उत उपादानकारणम् ? चतुर्थपादमाधारीकृत्य स्पष्टयत।

## अन्वितय: -- १-४

**प्रश्नः- ९** **अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः।** **१०**

१. ब्रह्मसूत्रभाष्यरत्नं केन विरचितम् ?

२. नारायणोपासने देवानाम् अधिकार: सम्भवति उत न ?

३. "शब्दादेव प्रमित:" इत्यस्मिन् सूत्रे "प्रमित:" इति शब्दस्य कोऽर्थ: ?

४. ब्रह्मसूत्रभाष्यरत्नस्य मङ्गलपद्यं किमस्ति ?

५. ब्रह्मसूत्रे कति अधिकरणानि वर्तन्ते ?

६. "अथातो ब्रह्मजिज्ञासा" इत्यत्र अथशब्दस्य कोऽर्थ: ?

७. प्रथमाध्यास्य चतुर्थपादे कति अधिकरणानि सन्ति ?

८. "अप्यय:" इति शब्दस्य कोऽर्थ: ?

९. "आनन्दमय:" इत्यत्रोक्त मयट्शब्द: किं प्राचुर्यार्थ: उत विकारार्थ: ?

१०. "अस्मिन्नस्य च तद्योगं शास्ति" इत्यस्मिन् सूत्रे प्रोक्तस्य "शास्ति" इति पदस्य कोऽर्थ: ?

११. "सर्वं खल्विदं ब्रह्म" इत्यत्रोक्तः ब्रह्मपदवाच्यः कः ?

१२. "इन्द्रप्राणाधिकरणस्य विषयः कस्यां विद्यायां श्रूयते ?

१३. वैश्वानरशब्देन कः उच्यते ?

१४. "ज्योतिरुपक्रमा" इति शब्देन का उच्यते ?

१५. ब्रह्म ते ब्रवाणि – इति श्रुतिवाक्यं कस्यामुपनिषदि समायाति ?

*****